श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ पञ्चपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चपञ्चाशः सर्गः ॥

## रावणाज्ञयाकम्पनादीनां युद्ध आगमनं वानरैः सह तेषां घोरं युद्धं च

वज्रदंष्ट्रं हतं श्रुत्वा वालिपुत्रेण रावणः।
बलाध्यक्षमुवाचेदं कृताञ्जलिमुपस्थितम् ॥ **6.55.1** ॥

शीघ्रं निर्यान्तु दुर्धर्षा राक्षसा भीमविक्रमाः।
अकम्पनं पुरस्कृत्य सर्वशस्त्रास्त्रकोविदम् ॥ **6.55.2** ॥

एष शास्ता च गोप्ता च नेता च युधि सत्तमः।
भूतिकामश्च मे नित्यं नित्यं च समरप्रियः ॥ **6.55.3** ॥

एष जेष्यति काकुत्स्थौ सुग्रीवं च महाबलम्।
वानरांश्चापरान् घोरान् हनिष्यति न संशयः ॥ **6.55.4** ॥

परिगृह्य स तामाज्ञां रावणस्य महाबलः।
बलं सम्प्रेरयामास तदा लघुपराक्रमः ॥ **6.55.5** ॥

ततो नानाप्रहरणा भीमाक्षा भीमदर्शनाः।
निष्पेतू राक्षसा मुख्या बलाध्यक्षप्रचोदिताः ॥ **6.55.6** ॥

रथमास्थाय विपुलं तप्तकाञ्चनभूषणम्।
मेघाभो मेघवर्णश्च मेघस्वनमहास्वनः ॥ **6.55.7** ॥

राक्षसैः संवृतो घोरैस्तदा निर्यात्यकम्पनः।
नहि कम्पयितुं शक्यः सुरैरपि महामृधे॥ **6.55.8** ॥

अकम्पनस्ततस्तेषामादित्य इव तेजसा।
तस्य निर्धावमानस्य संरब्धस्य युयुत्सया॥ **6.55.9** ॥

अकस्माद् दैन्यमागच्छद्धयानां रथवाहिनाम्।
व्यस्फुरन्नयनं चास्य सव्यं युद्धाभिनन्दिनः॥ **6.55.10** ॥

विवर्णो मुखवर्णश्च गद्गदश्चाभवत् स्वनः।
अभवत् सुदिने काले दुर्दिनं रूक्षमारुतम्॥ **6.55.11** ॥

ऊचुः खगमृगाः सर्वे वाचः क्रूरा भयावहाः।
स सिंहोपचितस्कन्धः शार्दूलसमविक्रमः॥ **6.55.12** ॥

तानुत्पातानचिन्त्यैव निर्जगाम रणाजिरम्।
तथा निर्गच्छतस्तस्य रक्षसः सह राक्षसैः॥ **6.55.13** ॥

बभूव सुमहान् नादः क्षोभयन्निव सागरम्।
तेन शब्देन वित्रस्ता वानराणां महाचमूः॥ **6.55.14** ॥

द्रुमशैलप्रहाराणां योद्धुं समुपतिष्ठताम्।
तेषां युद्धं महारौद्रं सञ्जज्ञे कपिरक्षसाम्॥ **6.55.15** ॥

रामरावणयोरर्थे समभित्यक्तदेहिनः।
सर्वे ह्यतिबलाः शूराः सर्वे पर्वतसन्निभाः॥ **6.55.16** ॥

हरयो राक्षसाश्चैव परस्परजिघांसया।
तेषां विनर्दतां शब्दः संयुगेऽतितरस्विनाम्॥ **6.55.17** ॥

शुश्रुवे सुमहान् कोपादन्योन्यमभिगर्जताम्।
रजश्चारुणवर्णाभं सुभीममभवद् भृशम्॥ **6.55.18** ॥

उद्धृतं हरिरक्षोभिः संरुरोध दिशो दश।
अन्योन्यं रजसा तेन कौशेयोद्धतपाण्डुना ॥ **6.55.19** ॥

संवृतानि च भूतानि ददृशुर्न रणाजिरे।
न ध्वजो न पताका वा चर्म वा तुरगोऽपि वा ॥ **6.55.20** ॥

आयुधं स्यन्दनो वापि ददृशे तेन रेणुना।
शब्दश्च सुमहांस्तेषां नर्दतामभिधावताम् ॥ **6.55.21** ॥

श्रूयते तुमुलो युद्धे न रूपाणि चकाशिरे।
हरीनेव सुसंरुष्टा हरयो जघ्नुराहवे ॥ **6.55.22** ॥

राक्षसा राक्षसांश्चापि निजघ्नुस्तिमिरे तदा।
ते परांश्च विनिघ्नन्तः स्वांश्च वानरराक्षसाः ॥ **6.55.23** ॥

रुधिरार्द्रां तदा चक्रुर्महीं पङ्कानुलेपनाम्।
ततस्तु रुधिरौघेण सिक्तं ह्यपगतं रजः ॥ **6.55.24** ॥

शरीरशवसङ्कीर्णा बभूव च वसुन्धरा।
द्रुमशक्तिगदाप्रासैः शिलापरिघतोमरैः ॥ **6.55.25** ॥

राक्षसा हरयस्तूर्णं जघ्नुरन्योन्यमोजसा।
बाहुभिः परिघाकारैर्युध्यन्तः पर्वतोपमान् ॥ **6.55.26** ॥

हरयो भीमकर्माणो राक्षसाञ्जघ्नुराहवे।
राक्षसास्त्वभिसङ्क्रुद्धाः प्रासतोमरपाणयः ॥ **6.55.27** ॥

कपीन् निजघ्निरे तत्र शस्त्रैः परमदारुणैः।
अकम्पनः सुसङ्क्रुद्धो राक्षसानां चमूपतिः ॥ **6.55.28** ॥

संहर्षयति तान् सर्वान् राक्षसान् भीमविक्रमान्।
हरयस्त्वपि रक्षांसि महाद्रुममहाश्मभिः ॥ **6.55.29** ॥

विदारयन्त्यभिक्रम्य शस्त्राण्याच्छिद्य वीर्यतः।
एतस्मिन्नन्तरे वीरा हरयः कुमुदो नलः ॥ **6.55.30** ॥

मैन्दश्च द्विविदः क्रुद्धाश्चक्रुर्वेगमनुत्तमम्।
ते तु वृक्षैर्महावीरा राक्षसानां चमूमुखे ॥ **6.55.31** ॥

कदनं सुमहच्चक्रुर्लीलया हरिपुङ्गवाः।
ममन्थू राक्षसान् सर्वे नानाप्रहरणैर्भृशम् ॥ **6.55.32** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चपञ्चाशः सर्गः ॥